# Pitha Stotram

# પીઠસ્તોત્રમ્

## Document Information

Text title : Pitha Stotram

File name : pIThastotram.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Proofread by : Manish Gavkar

Latest update : September 24, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 24, 2023

*sanskritdocuments.org*

# પીઠસ્તોત્રમ્

પીઠસ્તોત્રમહં વક્ષ્યે શ્રીશાર્ચાફલસિદ્ધયે ।
યેનાસ્ય પરિવારાણાં દેવાનાં સ્યાત્સમર્ચનમ્ ॥ ૧॥

ચિદાનન્દમયભક્તિજ્ઞાનસૌરભસમ્પદી ।
કારુણ્યામ્બુધિસઞ્જાતે ગુરુપાદામ્બુજે નમઃ ॥ ૨॥

શબ્દાર્થચરણસ્તર્કમધ્યો યોગહૃદન્તરઃ ।
વેદાન્તવદનસ્તસ્મૈ હરયે ગુરવે નમઃ ॥ ૩॥

ષડ્ગુણૈશ્વર્યસમ્પન્નં હરિલીલૈકસાક્ષિણમ્ ।
પ્રપન્નજનમન્દારમાચાર્યં પ્રણમામ્યહમ્ ॥ ૪॥

ભજનાનન્દલબ્ધ્યર્થં ભક્તવૃન્દૈરુપાસિતમ્ ।
શ્રીનન્દનન્દનાત્માનં વન્દે વન્દારુવત્સલમ્ ॥ ૫॥

અવિઘ્નં કુરુ મે નાથ અર્ચનાજ્ઞાં પ્રદેહિ મે ।
તવ પાદામ્બુજધ્યાનાત્સફલં સ્યાત્સ્વપૂજનમ્ ॥ ૬॥

તવૈવ પૂજનં હ્યેતત્ શ્રીમતો વાનુશાસનમ્ ।
તવૈવાતઃ પ્રસાદોઽસ્તુ ત્વદીયોઽહં સદા ભવે ॥ ૭॥

મનો ભગવતેઽનન્ત મહાપુરુષરૂપિણે ।
સમસ્તુ ગુણસઙ્ખ્યાનાયાં વ્યક્તાય ચ વિષ્ણવે ॥ ૮॥

નમો ધરાયૈ જગતાં સર્વરત્નમહેશ્વરિ ।
સર્વંસહાયૈ દિવ્યાયૈ વિષ્ણુપત્ન્યૈ નમોઽસ્તુ તે ॥ ૯॥

નમઃ ક્ષીરસુધાસિન્ધો અગ્નિરુદ્ધાશ્રયાય તે ।
વિશુદ્ધૈશ્વર્યવિજ્ઞાનશાલિને હરયે નમઃ ॥ ૧૦॥

વૈકુણ્ઠાય નમો નિત્યં વિરજાયૈ નમો નમઃ ।
નન્દનાય નમો વિષ્ણોઃ સુનન્દાદિભ્ય એવ ચ ॥ ૧૧॥

બ્રહ્મણે વિષ્ણવે ચાપિ શિવાય રવયે નમઃ ।
મથુરામણ્ડલાયાથો શ્રીમતેઽસ્તુ નમો નમઃ ॥ ૧૨॥

નમો વૃન્દે ચ સઙ્કેતે વને કાત્યાયનિ પરે ।
મથુરે નવવારે ચ ચતુર્વારિ મહેશ્વરિ ॥ ૧૩॥

યોગમાયે નમસ્તુભ્યં ગોકુલાય નમો નમઃ ।
નન્દાદ્રયે તથાનન્દાદ્રયે કામાદ્રયે નમઃ ॥ ૧૪॥

ગોવર્દ્ધનાય ચરણાદ્રયે નિત્યં નમો નમઃ ।
અક્ષરબ્રહ્મરૂપાયૈ સ્વર્ણભૂમ્યૈ નમો નમઃ ॥ ૧૫॥

વેદાય ઋગ્યજુઃસામાથર્વજ્ઞાનભુવે નમઃ ।
ભક્ત્યૈ નમસ્તદઙ્ગેભ્યઃ શ્રવણેભ્યો નમો નમઃ ॥ ૧૬॥

નમઃ સર્વાત્મભાવાય પ્રેમ્ણે નિત્યં નમો નમઃ ।
સર્વોપનિષદાનન્દરસાયૈ સરિતે નમઃ ॥ ૧૭॥

ઐશ્વર્યેભ્યો નમસ્તસ્યાનુગ્રહાય નમો નમઃ ।
મહાનુભાવભાવાય પ્રભવાય નમો નમઃ ॥ ૧૮॥

યોગસંશુદ્ધહૃત્પદ્મં નત્વા શ્રીવ્રજભૃદ્વધૂઃ ।
નિચોલાય નમો નિત્યં પીઠાય હરયે નમઃ ॥ ૧૯॥

નમો માનસગઙ્ગાયૈ પાનમાનરતીન્દુષુ ।
સરસ્સુ ચ નમશ્ચાથ નમઃ કુસુમપુષ્કરમ્ ॥ ૨૦॥

હરયે ભાનવે જાતપીતપુષ્કરયોર્નમઃ ।
અથેશપુષ્કરં નત્વા કાલિન્દિન્યૈ નમો નમઃ ॥ ૨૧॥

નમોઽસ્તુ દશકૂપેભ્યસ્તડાગેભ્યો નમો નમઃ ।
નમઃ ષોડશઘટ્ટેભ્યો નમેત્કુણ્ડોનષષ્ટિષુ ॥ ૨૨॥

દ્વાદશેભ્યો વનેભ્યશ્ચ તથોપવનકાન્નમેત્ ।
નમો દશવટેભ્યશ્ચ ચતુસ્તાપિચ્છિકાન્નમેત્ ॥ ૨૩॥

વન્દિન્યૈશ્ચ નમશ્ચાથ આનન્દિન્યૈ નમો નમઃ ।
પ્રભુપ્રિયાયૈ સ્વામિન્યૈ વલ્લભાયૈ નમો નમઃ ॥ ૨૪॥

ખગેશ્વરાય મન્દારાદ્યાયુધેભ્યો નમો નમઃ ।
દામભ્યો બહુલાશ્વાદિભ્યો યદુભ્યો નમઃ ॥ ૨૫॥

પ્રભુપ્રિયાયૈ સ્વામિન્યૈ વલ્લભાયૈ નમો નમઃ ।
પાથેભ્યશ્ચોદ્ધવાદિભ્યો ભક્તેભ્યોઽપિ નમો નમઃ ।
કુશસ્થલનિવાસિભ્યો મન્ત્રિભ્યોઽપિ નમો નમઃ ॥ ૨૬॥

વસુદેવાય દેવક્યૈ સહજાભ્યાં નમો નમઃ ।
પત્નીભ્યો મહિષીભ્યશ્ચ તત્પ્રિયાભ્યો નમો નમઃ ॥ ૨૭॥

નમો યશોદાનન્દાભ્યાં નમો ગોપાલબાલયોઃ ।
યમુનાયૈ સખિભ્યશ્ચ ગોભ્યો નિત્યં નમો નમઃ ॥ ૨૮॥

સિદ્ધાભ્યો દમનેભ્યશ્ચ શક્તિભ્યોઽપિ નમો નમઃ ।
સ્વાત્મગોપાલકેભ્યશ્ચ સ્વપ્રિયાભ્યો નમો નમઃ ॥ ૨૯॥

પરમાનન્દરૂપાય શ્રીનાથાય નમો નમઃ ।
નમો નિખિલગોવિન્દપરિવારાત્મને નમઃ ॥ ૩૦॥

પીઠસ્તોત્રમિદં પુણ્યં યઃ પઠેદ્વૈષ્ણવો જનઃ ।
ધ્યાયંસ્તત્પ્રાતરુત્થાય તસ્ય સ્યાન્મનસેપ્સિતમ્ ॥ ૩૧॥

ઇતિ શ્રીશાણ્ડિલ્યસંહિતાયાં પઞ્ચમે ભક્તિખણ્ડે ષોડશોઽધ્યાયે
પીઠસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Manish Gavkar

*Pitha Stotram*

pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*